# Chorashaila Ashtakam

# चोरशैलाष्टकम्

## Document Information

Text title : Chorashaila Ashtakam

File name : chorashailAShTakam.itx

Category : devii, devI, aShTaka

Location : doc_devii

Proofread by : Mohan Chettoor

Description/comments : From Stotras Samahara Part 1 (ed. K.Raghavan Pillai)

Latest update : September 4, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 4, 2022

*sanskritdocuments.org*

# चोरशैलाष्टकम्

नाभौ सन्नतमुन्नतं कुचभरे नानायुधोद्यद्भुजं
सौभाग्यावधिमुग्धवक्त्रकमलं सर्वाभिरामाकृति ।
पारेबद्धपयोधि भासुरतरं चोराचलाधीश्वरं
दूरे दुर्गतिजृम्भितानि भवतां धूनोतु दौर्गं महः ॥ १॥

व्यामीलन्महिषासुरत्रिकतटीविन्यस्तपादाम्बुजा
श्यामीभूतशशाङ्कबिम्बरचनासम्भाव्यवक्त्राम्बुजा ।
सीमोल्लङ्घनशङ्कया श्रुतिपथे विश्रान्तनेत्राम्बुजा
श्रीमच्चोरगिरीश्वरी गिरिसुता श्रेयांसि पुष्णातु वः ॥ २॥

लीलालीनलुलायकण्ठकदलीकाण्डाग्रनालीगल-
त्कीलालद्रवकर्दमद्रुतगतिक्रीडाकृताध्वश्रमा ।
हेलावल्गितहृद्यखड्गलतिकाखास्कारवीरोद्धता
बाला मण्डितचोरशैलगहना मथ्नातु वो वैरिणः ॥ ३॥

निस्त्रिंशप्रकटत्रुटद्गळगळन्नीरन्ध्ररक्तच्छटा-
विस्तारस्तबकान्तरव्यतिरटद्वेताळमालावृता ।
विष्टभ्याङ्घ्रितलेन माहिषमहादैत्यं मुहुर्मथ्नती
पक्षान् मङ्क्षु भवद्द्विषां विशसतात् पाटच्चराद्रीश्वरा ॥ ४॥

बल्गत्खड्गभुजङ्गफूत्कृतधुतप्रध्वस्तदैत्यायुतं
नृत्यद्दृतमहालुलायकलहक्रीडत्कृपाणीतलम् ।
तृप्यत्स्वर्पतिर्दिव्यवन्दिवदनप्रक्रान्तजैत्रारवं
गर्जद्विद्विदभर्जनं भवतु वश्चोराद्रिमाद्यं महः ॥ ५॥

सेवानम्रसुरेन्द्रवीरपृतनामाणिक्यमौलिच्छटा-
खेलोद्धट्टघणद्घणत्कृतमणिक्षोणीमहामण्डपे ।
नानारागमरीचिवीचिविभवप्रोन्निद्रभद्रासने
वीरास्थानवहा मलिम्लुचगिरेर्नाथैव नाथास्तु वः ॥ ६॥

आनन्दद्रवदिव्यसिन्धुलहरीवर्षाभिवर्षं दृशा-
    मायामी यमिनां मनोभिरनिशालेह्यो नवाह्यो रसः ।
नीरन्ध्राभरणप्रभानिरवधिखाद्गु द्रुतं पातु व-
    श्चोराद्रेर्मणिदीपधाम जगतां माता सहः पातु वः ॥ ७॥

धारावर्षि धनं धनप्रणयिनामाराधनीयं परं
    वीराणां मरुतां विपत्सु शरणं वाग्वैभवं वाग्मिनाम् ।
धीराणां द्रुतनिवृतिः सुकृतिनां नेत्रे सुधास्वादिमा
    चोराद्रेर्मणिदीपधाम जगतां माता महः पातु वः ॥ ८॥

इति तदिदमष्टकं पुष्टभूषा परं
जगदभिमतश्रियाम्प्यधाराधकम् । (नव्यधाराधरम् ।)
श्रवणयुगळे मुहुः शीतगीतामृ तै-
र्वहतु भुवनेश्वरा चोरशैलेश्वरा ॥ ९॥

(This stotra is in praise of Durga at Chorashaila
Kallarkod near Alleppey)

इति चोरशैलाष्टकं सम्पूर्णम् ।

Proofread by Mohan Chettoor

*Chorashaila Ashtakam*
pdf was typeset on September 4, 2022

Please send corrections to *sanskrit@cheerful.com*